This Question Paper consists of 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. 63/SS/A
गूढसंख्या

Set
स्तबकः **A**

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (348)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ____________________

**Signature of Invigilators** 1. ____________________
**(निरीक्षकयोः हस्ताक्षरम्)**
2. ____________________

**सामान्या निर्देशा :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां च संख्या प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या 63/SS/A, सेट- A नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।



Unnati Educations
9899436384, 9654279279

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (348)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)]** **[पूर्णाङ्काः (Full Marks) : 100**

---

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे [A] भागे **10**, [B] भागे **10**, [C] भागे **10,** [D] भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

[A] दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) राजतरङ्गिणी कस्य कृतिः ।

(क) अश्वघोषस्य (ख) कालिदासस्य

(ग) कल्हणस्य (घ) विल्हणस्य

(2) दिलीपः सुदक्षिणा च कस्य मुनेः आश्रमं गतवन्तौ ।

(क) वसिष्ठस्य (ख) विश्वामित्रस्य

(ग) अगस्त्यस्य (घ) काश्यपस्य

(3) श्रीरामः किम् अधिकं मन्यते ।

(क) ध्यानम् (ख) अभ्यासम्

(ग) प्रजापालनम् (घ) शत्रुविनाशम्

(4) मोहमुद्गरे सर्वस्य सुखस्य कारणं किम् ।

(क) विरागः (ख) भोगः

(ग) कामः (घ) लोभः

(5) परमात्मनः अमृता कला का भवति ।

(क) वाग्देवी (ख) गङ्गा

(ग) यमुना (घ) काश्यपः



Unnati Educations
9899436384, 9654279279

(6) अपरिणामोपशमो भवति कः ।

(क) लक्ष्मीमदः (ख) अलसः

(ग) यौवनम् (घ) इन्द्रियम्

(7) अनुमितिवादः कस्य आचार्यस्य भवति ।

(क) भट्टलोल्लटः (ख) अभिनवगुप्तः

(ग) शङ्कुकः (घ) भट्टतौतः

(8) क्षेमेन्द्रः कस्मिन् समये आसीत् ।

(क) चतुर्दशशतके (ख) त्रयोदशशतके

(ग) द्वादशशतके (घ) एकादशशतके

(9) दिलीपस्य गुणाः के इव आसन् ।

(क) सप्रसवाः (ख) बन्धवः

(ग) शत्रवः (घ) आत्मीयाः

(10) राजलक्ष्मीः शास्त्रदृष्टीनां का ।

(क) तिमिरोद्गतिः (ख) संवर्धनधारा

(ग) आनन्दसन्दोहः (घ) तापनिवारिका

[B] दशानां यथानिर्देशम् उत्तराणि लिखत । 2×10=20

(1) श्रीहर्षविरचितं महाकाव्यं किम् । तत्र कति सर्गाः सन्ति ।

(2) गौरवटोः कुटिरं कीदृशम् आसीत् । कुटिरस्य कस्यां दिशि सर आसीत् ।

(3) अलङ्कारसम्प्रदायस्य प्रवर्तकः कः । तद्विरचितः कः ग्रन्थः ।

(4) अविमारकस्य कुरङ्ग्याः च प्रेमाश्रितं किं रूपकम् । तत्र कति च अङ्काः सन्ति ।

(5) भट्टिस्वामिविरचितं काव्यं किम् । तस्यापरं नाम किम् ।

(6) गौरवटोः सतीर्थ्यः कः । स च कीदृश आसीत् ।

(7) कलिङ्गः साहसिकः इति कस्या लक्षणाया उदाहरणम् । लक्षणाया लब्धस्य अर्थस्य किं नाम ।

(8) अन्वितानां पदार्थानाम् अभिधानं भवति इति कस्मिन् वादे स्वीक्रियते । तस्य वादस्य समर्थकाः च के सन्ति ।

(9) अन्तिमम् अक्षरं गुरुसंज्ञकं यस्य गणस्य तस्य नाम किम् । अक्षरत्रयं गुरुसंज्ञं भवति चेत् कः गणः ।

(10) केन वित्तेन चित्तं विनोदनीयम् । कीदृशो गर्वो न करणीयः ।



Unnati Educations
9899436384, 9654279279

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) शिवराजविजये कालकलापं प्रतिपादयत ।

(2) उत्तररामचरितानुसारेण श्यामवृक्षं वर्णयत ।

(3) गुरुस्वरनियमान् वर्णयत ।

(4) 'अथाभ्यर्च्य विधातारम्' इति 'कलत्रवन्तमात्मानम्' इति वा प्रतीकोद्धृतं श्लोकं प्रपूर्य व्याख्यात ।

(5) दक्षिणदेशः कीदृशः इति शिवराजविजयानुसारेण प्रतिपादयत ।

(6) 'उत्पन्नपरिपूतायाः' इति 'तुरगविचयव्यग्रान्' इति वा प्रतीकोद्धृतं श्लोकं सम्पूर्य व्याख्यात ।

(7) दिव्यास्त्रवृत्तान्तं ब्रह्मादयः इत्यादिश्लोकव्याख्यानेन वर्णयत ।

(8) वंशस्थं द्रुतविलम्बितम् इत्यनयोः एकस्य च्छन्दसः लक्षणम् उक्त्वा उदाहरणे लक्षणसमन्वयः कार्यः ।

(9) रसास्वादे साधारणीकरणं यथाग्रन्थं वर्णयत ।

(10) राजलक्ष्म्याः परस्परविरुद्धं चरितम् इति प्रमाणयत ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) वित्तमदमत्तचित्ता धूर्तैः आवृता राजानः कथम् आचरन्ति इति यथाग्रन्थं स्पष्टयत ।

(2) शिवराजविजयस्य सूर्योदयं वर्णयत ।

(3) उत्तररामचरितस्य नान्दीश्लोकः कः । नान्दीलक्षणमुक्त्वा समन्वयपूर्वकं श्लोकं व्याख्यात ।

(4) लक्षणावृत्तिं स्वभाषया समासेन वर्णयत ।

(5) उपमा अनन्वयः इत्यनयोः एकम् अलङ्कारं सोदाहरणं प्रतिपादयत ।



Unnati Educations
9899436384, 9654279279